# Sarvaduhkhapariharakam Nrisimhastotram

# સર્વદુઃખપરિહારકં નૃસિંહસ્તોત્રમ્

## Document Information

Text title : Nrisimhastotram Sarvaduhkhapariharakam

File name : sarvaduHkhaparihArastotram.itx

Category : vishhnu, dashAvatAra, stotra, narasiMhapurANa, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa, narasiMhapurANa | adhyAya

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 4, 2025

*sanskritdocuments.org*

Sarvaduhkhapariharakam Nrisimhastotram

# સર્વદુઃખપરિહારકં નૃસિંહસ્તોત્રમ્

શ્રીગણેશાય નમઃ । શ્રીલક્ષ્મીનૃસિંહાય નમઃ ।
નારાયણં નમસ્કૃત્ય નરં ચૈવ નરોત્તમમ્ ।
દેવીં સરસ્વતીં ચૈવ તતો જયમુદીરયેત્ ॥ ૧॥

તપ્તહાટકકેશાન્ત જ્વલત્પાવકલોચન ।
વજ્રાધિકનખસ્પર્શ દિવ્યસિંહ નમોઽસ્તુ તે ॥ ૨॥

પાન્તુ વો નરસિંહસ્ય નખલાઙ્ગકોટયઃ ।
હિરણ્યકશિપોર્વક્ષઃ ક્ષેત્રાસૃક્કર્દમારુણઃ ॥ ૩॥

હિમવદ્વાસિનઃ સર્વે મુનયો વેદપારગાઃ ।
ત્રિકાલજ્ઞા મહાત્માનો નૈમિષારણ્યવાસિનઃ ॥ ૪॥

યેઽર્બુદારણ્યનિરતાઃ પુષ્કરારણ્યવાસિનઃ ।
મહેન્દ્રાદ્રિરતા યે ચ યે હિ વિન્ધ્યાદ્રિવાસિનઃ ॥ ૫॥

ધર્મારણ્યરતા યે ચ દણ્ડકારણ્યવાસિનઃ ।
શ્રીશૈલનિરતા યે ચ કુરુક્ષેત્રનિવાસિનઃ ॥ ૬॥

કૌમારપર્વતે યે ચ યે ચ પમ્પાનિવાસિનઃ ।
એતે ચાન્યે ચ બહવઃ સશિષ્યાઃ મુનયોઽમલાઃ ॥ ૭॥

સૂતમભ્યર્ચ્ય તત્રૈવ સ્થિતવાન્મુનયો ગતાઃ ।
ઇત્યેતત્સર્વમાખ્યાતં પુરાણં નારસિંહકમ્ ॥ ૮॥

પઠતાં શ‍ૃણ્વતાં નૃણાં નરસિંહઃ પ્રસીદતિ ।
સર્વપાપહરં પુણ્યં સર્વદુઃખનિવારણમ્ ॥ ૯॥

ન તેષાં કોઽપિ બન્ધસ્તુ કદાચિદપિ જાયતે ।
વિષ્ણવેઽર્પિતમિદં પુરાણં સર્વકામદમ્ ॥ ૧૦॥

ભક્ત્યા ચ વદતામેતત્ શ‍ૃણ્વતાં ચ ફલં શ‍ૃણુ ।

શતજન્માર્જિતૈઃ પાપૈઃ સદ્ય એવ વિમોચિતાઃ ॥ ૧૧॥

સહસ્રકુલસંયુક્તાઃ પ્રયાન્તિ પરમં પદમ્ ।
કિં તીર્થૈર્ગોપ્રદાનૈર્વા તપોભિર્વા કિમધ્વરૈઃ ॥ ૧૨॥

અહન્યહનિ ગોવિન્દં તત્પરત્વેન શ‍ૃણ્વતામ્ ।
ય પઠેત્પ્રાતરુત્થાય પદસ્ય શ્લોકવિંશતિમ્ ॥ ૧૩॥

જ્યોતિષ્ટોમફલં પ્રાપ્ય વિષ્ણુલોકે મહીયતે ।
એતત્પવિત્રં પૂજ્યં ચ ન વાચ્યમકૃતાત્મનામ્ ॥ ૧૪॥

દ્વિજાન્ના વિષ્ણુભક્તાનાં શ્રાવ્યમેતન્ન સંશયઃ ।
એતત્પુરાણશ્રવણમિહામુત્રસુખપ્રદમ્ ॥ ૧૫॥

વદતાં શ‍ૃણ્વતાં સદ્યઃ સર્વપાપપ્રણાશનમ્ ।
બહુનાત્ર કિમુક્તેન ભૂયો ભૂયો મુનીશ્વરાઃ ॥ ૧૬॥

શ્રદ્ધયાઽશ્રદ્ધયા વાપિ શ્રોતવ્યમિદમુત્તમમ્ ।
ભારદ્વાજમુખાત્સર્વે કૃતકૃત્યા દ્વિજોત્તમાઃ ॥ ૧૭॥

સૂતં હૃષ્ટાઃ પ્રપૂજ્યાથ સર્વે સ્વં સ્વાશ્રમં યયુઃ ।
પ્રક્ષીણપાપબન્ધાસ્તે મુક્તિં યાન્તિ નરા ઇતિ ॥ ૧૮॥

ઇતિ શ્રીનૃસિંહપુરાણે સર્વદુઃખપરિહારકં નૃસિંહસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by M K Barman

*Sarvaduhkhapariharakam Nrisimhastotram*

pdf was typeset on October 4, 2025

Please send corrections to *sanskrit@cheerful.com*